# मूल्यशिक्षामाध्यमेन मूल्यबोधजागरणम्

**Gobinda Sarkar**
Ph.D. Research Scholar (Dept. of Education), Rashtriya Sanskrit Vidyapeetha, Tirupati, India
Eamil – sarkar.gobinda2012@Gmail.com

**उपोद्घातः –**

अस्यां जगति यानि वस्तूनि अस्माकम् आवश्यकतां पूरयन्ति, लक्ष्यम् उद्देश्यानि वा साधयन्ति, आशानाम् आकांक्षाणां साफल्याय सहायकानि च भवन्ति तदेव मूल्यमिति उच्यते। भारतीयदार्शनिकाः मुनयः आध्यात्मिकवादिनश्च मूल्यं शीलम् इत्यर्थे व्यवहरन्ति। एतेषां मतानुसारं मूल्यमिति शब्दस्यार्थः भवति उत्तमव्यवहारः। अतः भर्त्तृहरिणा उक्तं यत् –

"सर्वेषामपि सर्वकारणभिदं शीलं सर्वस्य भूषणम् "।[1]

अस्माकं भारतीयसंस्कृतिः मूल्यबोधमाश्रित्य तिष्ठति। वैदिककाले अनुशासनं, समानतां, सामाजिकादर्शश्च समाजस्य मानदण्डरूपेण आसीत्। वैदीककालीनमानवाः मानवीयमूल्यानि प्रति सर्वदा जागरुकाः आसन्। तत्र गुरुकुलशिक्षायां मूल्यबोधविषयकतथ्यानि निहितानि आसन्। तत्र छात्राः सामाजिकमूल्यशिक्षां लब्धवन्तः। यथा -

**"सत्यं वद। धर्मं चर।[1] स्वाध्यान्मा प्रमदः।[1] मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव।अतिथिदेवो भव"।[1]**

परन्तु आधुनिकभोगवादिसंसारे छात्राः पठनसमये एव मातापितृन् गुरून् विस्मरन्ति, अध्यापकान् श्रद्धां न कुर्वन्ति। समाजे सर्वत्र विशृङ्खला दृश्यते। अतः एतादृशावस्थायां शिक्षायां मूल्यबोधविषकशिक्षायाः अत्यावश्यकता वर्तते।

**परिभाषाः -**

1) Values are normative standers by which beings are influenced in their choice among the alternative course of action which they perceive.[1]
2) मूल्यं कस्याः अपि व्यक्तेः रूचेः एकप्रकारकम् उद्देश्यं भवति। यस्य उत्पत्तिः उद्देश्यरूचयोः मध्ये विशिष्टसम्बन्धद्वारा जायते।[2]
3) मूल्यं समाजेन स्वीकृताः ताः प्रेरणाः एवं लक्ष्यमस्ति, यदनुकूलशिक्षणस्य एवं सामाजिकरणस्य च प्रक्रियाद्वारा व्यक्तेः अन्तर्भूय तस्य प्राथमिकतायाः रूपं धारयति।[3]

**मूल्यशिक्षायाः उद्देश्यानि -**

i. समाजाय व्यवहारकुशलनागरिकनिर्माणम्।
ii. वैयक्तिक-सामूहिकश्च शान्तिप्राप्तिः।
iii. सत्चरित्रनिर्माणम्।

iv. अस्मासु सामाजिकेषु नागरिकेषु नैतिकार्थिकसामाजिकसांस्कृतिक-राजनैतिक-शैक्षिक-मनोवैज्ञानिकमूल्यानां विकास-सम्पादनम्।
iv. परस्परसहयोगभावनायाः विकाससम्पादनम्।

vi. राष्ट्रियान्ताराष्ट्रैकता-प्रेम-बन्धुत्वभावनानां विकासः।
vii. सर्वधर्मान् प्रति श्रद्धाभावम् उत्पादनम्।

**मूल्यशिक्षायाः आवश्यकता-**

मूल्यशिक्षा बालकं सम्पूर्णकर्मनिष्ठं सम्पाद्य समाजे सुखमयसन्तोषपूर्णजीवनयापने समर्थं सम्पादयतीति तार्कुण्डे[4] अभिप्रैति। स्वयं सहायकसामाजिक-नैतिककौशलानां पर्याप्तविकासेन बालकः पर्याप्तमात्मविश्वासं लभते तथा स समुदायेन अङ्गीक्रियते च।

आत्मनि प्रकाशदर्शनं शिक्षायाः वास्तविकमुद्देश्यम्। स्वान्तर्निष्ठसत्यज्योतिषः प्रज्वलनेनैव विद्यालये प्राप्तं ज्ञानं विवेकत्वेन परिणमते। एतत्सम्पादनार्थं बालकेषु मानवमूल्यविकासो विधेयः मूल्यानां प्राथम्यं देयमित्येषाभिवृत्तिः जागरणीया, येन तदीयव्यवहारे गुणात्मकपरिवर्तनं स्यात्।

मूल्यविकासप्रक्रिया तु गतिशीला, परिवर्तनशीला, समाजावश्यकतानुगुणं सञ्चनयोग्या च भवति। विभिन्नपरिस्थितीः विशिष्य बालकः आत्मनः कृते किं श्रेष्ठमिति निर्णीते। एवं सः यानि मूल्यानि आत्मनो हिताय आनन्दाय च अपेक्ष्यन्ते तान्यात्मनि विकासयन्नग्रे सरति।

---

1. Filing
2. आर्. बि. पर्सी
3. राधाकमल मुखर्जी
4. Tarkunde, 1978

**मूल्यबोधह्रासस्य कारणानि -**

i. पाश्चात्यसंस्कृतेः आधिक्यम्।
ii. अत्याधिकाभिजात्यभावः (High Status)।
iii. धर्मान् प्रति अवहेलनम्।
iv. दूरभाषान्तर्जालयोः अपव्यवहारः।
v. गुरुजनान् प्रति श्रद्धाहीनता।
vi. उद्योगहीनता।

साम्प्रतिकशिक्षणप्रणाल्यां नैतिकाध्यात्मिकमूल्यानां ह्रासमभिलक्ष्य शिक्षायोगेन प्रोक्तं यत् - "At a time when the need to cultivate a sense of moral and social responsibility in the rising generation is paramount, education does not emphasis character formation and makes little or no effort to cultivate moral and spiritual values, particularly attitudes and values for a democratic and socialistic country". [5]

**शिक्षया मूल्यबोधजागरणस्य उपायाः –**

आधुनिककाले शिक्षाजगति वैज्ञानिकस्य विकासस्य कालः इति कथ्यते। पुनः मानवाः भोगवादिप्रवृत्तेः आसक्ताः भवन्ति। अयं समाजः सुखहीनं,शान्तिहीनं, विश्रृङ्खलामयञ्च अभवत्। परन्तु मानवजीवनं सर्वजीवेषु श्रेष्ठजीवनम्।

अतः अस्माकं जीवनं सुखमयं शान्तिमयं करणीयम्, अर्थात् भोगवादिप्रवृत्तीः परित्यज्य जीवनेषु सच्चरित्र-सहयोग-सद्भाव-परोपकार-कर्त्तव्यनिष्ठता-सेवादिभावनानां विकासः करणीयः। अतः शिक्षासंस्थासु नैतिकाध्यात्मिकार्थिक-सामाजिक-धार्मिकशाक्षायाः आवश्यकता अनुभूयते। कुतः अनया मूल्ययुक्तशिक्षया समाजेनिवसन्तः जनानां मूल्यबोधस्य वर्धनं भवति।

**सत्चरित्रस्य निर्माणम् -**

सत्चरित्रनिर्माणाय मूल्यशिक्षा आवश्यकी, सत्चरित्रमेव व्यक्तेः जीवनस्य सफलताविफलतयोः सूचकमस्ति। व्यक्तेः भाग्यनिर्माणं तस्य उत्तमचरित्रेण आव सञ्जायते। अतः यदि वयं मानवं सफलव्यक्तित्वेन, उत्तमनागरिकत्वेन, आदर्शनागरिकत्वेन, समाजस्य उपयोगिसदस्यरूपेण निर्मातुमिच्छामः, तर्हि तस्य सत्चरित्रस्य निर्माणम् अत्यावश्यकं वर्तते। सत्चरित्रभिः, महानपुरुषैः च सह ये गच्छन्ति, मिलन्ति तेषां सर्वेषां उन्नतिः भवति। अतः विष्णुशर्मामहोदयेन उक्तम् यत् -

“महाजनस्य सम्पर्कः कस्य न उन्नतिदायकः।
पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम्।“[6]

**सदाचारः -**

"सत् - आचारः सदाचारः"। सर्वदा सदाचारेण अभ्यासेन अतिसाधारणमानवमपि आदर्शमानवे उत्तीर्णः भवति। यथा नरेन्द्रनाथदत्तः सदाचारपालनेन स्वामिविवेकान्दरूपेण परिवत्तितः जातः। यतः सद्गुणैः सदाचारैश्च भगवद्प्राप्तिः आदर्शमानवगुणसमन्वितः सामाजिकश्च भवति। अतः मनुना उक्तम्- "आचारः परमो धर्मः"।[7]

**उत्तमगुणसम्पन्नाः भवेयुः –**

उपनिषदि गुणत्रयं विद्यते। यथा – सत्त्यरजस्तमश्चेति। एतेषु गुणेषु रजस्तमगुणप्रधाने आसुरे जीवे दम्भः, दर्पः, क्रोधः, निष्ठुरता, अज्ञानादि, असद्गुणाः स्वतः प्रकाशिताः भवन्ति। अधुना समाजे एतादृशगुणसम्पन्नाः जनाः सर्वत्र विराजन्ते। अनेन कारणेन विश्वे सर्वेषु देशेषु सर्वत्र अहिंसा, विश्रृङ्खला शान्तिहीनता दरीदृश्यते।

अतः श्रीकृष्णेन उक्तम् -

“दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्।।“[8]

परन्तु दैवप्रकृतिसम्पन्ने मनुष्ये सत्त्वगुणस्य प्राधान्येन ज्ञानं, दया, स्वाध्यायं, दानं, शान्ति, अहिंसा, सत्यम्, अक्रोधः, त्यागः, अपैशुनं, क्षमा, शौचं, अद्रोहः, अचापलञ्च इत्यादिनां षड्विंशतिः शुभगुणाः विकसन्ति। अतः श्रीभगवानुवाच -

“अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।[9]
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्।।[10]

[5] .Educational commission 1964-66
[6]. (पञ्चतन्त्र-3/60)
[7] . मनुस्मृतिः 1/108)
[8] . श्रीमद्भगवद्गीता - 16/4
[9] . श्रीमद्भगवद्गीता - 16/1

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति सम्पदं दैवीमभिजातस्य भारत।।"[11]

एतादृशगुणसम्पन्नाः जनाः समाजसंस्कारेण आदर्शशान्तिमयसमाजं निर्मान्ति।

**समुचितमूल्यानां समावेशः –**

सम्प्रतिः पाश्चात्यदेशस्य समाजे नैतिकशिक्षायाः अभावस्य कारणात् बहवः दोषाः समुत्पन्नाः। अतः तत्रत्यानां महतां विचारकाणाम् इयमेव धारणा सञ्जाता यत् नैतिकशिक्षाया छात्रेषु उचितमूल्यानां समावेशः अनिवार्यः अस्ति। अतः तेषाम् उन्मूलनार्थं पाश्चात्यविचारकाणां धारणानामनुसारम् अत्रापि कार्यकरणम् अत्यावश्यकं वर्तते।

**पाठक्रमे मूल्यशिक्षायाः अन्तःकरणम् –**

साम्प्रतिककालः वैज्ञानिकस्य मनोवैज्ञानिकस्म च विकासस्य कालः इति कथ्यते। पूराकाले **"विद्या ददाति विनयम्"** इति धेयवाक्यमासीत्। परन्तु आधुनिककाले छात्राः विद्यां प्राप्यापि अविनयभावं प्रदर्शयन्ति। अतः एतादृशावस्थां दूरीकरणाय मूल्यबोधविषयकशिक्षायाः अपेक्षते। परन्तु अधुना विद्यालये, महाविद्यालये, विश्वविद्यालये मूल्यबोधशिक्षायाः महत्वं न दीयते। एतदर्थं छात्राः विशृङ्खलिताः भवन्ति। भोगवादिप्रवृत्तिं परित्यज्य जीवनेषु सच्चरित्र-सहयोग-सद्भाव-परोपकार-नैतिकता-श्रद्धा-आध्यात्मिकता-कर्त्तव्यनिष्ठता-सेवादिभावनानां विकासः करणीयः, येन बालकाः बालिकाश्च आन्तरिक-बाहयपरिस्थितिषु समायोजनं कर्तुं पारयन्ति। एतदर्थं शिक्षाक्षेत्रेषु मूल्यबोधशिक्षायाः आवश्यकता अनुभूयते। अतः प्राथमिकविद्यालयात् विश्वविद्यालपर्यन्तं नैतिकाध्यात्मिक-सामाजिकमूल्यसम्बन्धितं विषयं नीतिकथाःच पाठक्रमे भवेयुः।

**मूल्यशिक्षायां शिक्षकस्य अवदानम् –**

छात्राणामुपरि शिक्षकस्य व्यक्तिगतप्रभावं विना शिक्षणप्रक्रिया सफला न भवति। उपयुक्तव्यवहारप्रदर्शनाय छात्राणामन्तःकरणं प्रति मूल्याधारिता शिक्षा प्रेषणीया। एतत्कार्यं केवलमध्यापक एव सम्पाद्य छात्राणामान्तरिकविकासे महत्वपूर्णभूमिकां स्वीकरोति। जिज्ञासूनां छात्राणां समस्यां दूरीकृत्य तान् सन्मार्गे परिचालयन्ति अध्यापकाः। यथोक्तम् - "The school is a gardens the pupil is a teacher plant and the teacher is a careful gardener."[12]

वाटिकायाः रक्षकः यथा स्वसेवया प्रयासेन परिश्रमेण च क्षुद्रवृक्षान् विकसितान्, पुष्पितान्, प्रस्फुटितान् च करोति तद्वत् अध्यापकः प्रार्थितयशसः छात्रान् ज्ञानानन्देन अमृतीकरोति, छात्राणां जीवनोन्नतिश्च साधयति। आदर्शाध्यापकानाम् आदर्शेण छात्राः प्रभाविताः भूत्वा स्वलक्ष्यं निर्धारयन्ति, तस्य लक्ष्यस्य पूर्तये आत्मानं नियोजयन्ति च।

**निष्कर्षः -**

मानवेषु मानवीयमूल्यानां जागरणाय नैतिकचारित्रिकाध्यात्मिक-सामाजिकमूल्यानि यथा उपकुर्वन्ति तथैव विद्यालये अपि छात्राणां मूल्यविकासे उपकारकं भवति। मूल्यशिक्षां प्राप्य छात्राः यस्मिन् देशे यदाचारः परम्पराक्रमादयः इति नियममनुसृत्य ते तथा आचरन्ति। परन्तु येषां विद्या, तपः, दानं, ज्ञानं, शीलं, गुणः, धर्मः विषये सम्यक् ज्ञानं नास्ति ते मनुष्यभूत्वाऽपि समाजे वनस्य पशुवत् विचरन्ति। यथा -

"येषां न विद्या न तपो न दानं, ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूता, मनुष्यरूपेण मृगाश्चरन्ति।।[13]"

सत्यं शिवं सुन्दरम् इत्युच्चादर्शानां प्राप्तिः एव जीवनस्य मूललक्ष्यम्। जीवनस्य श्रेष्ठत्वम् अनेन लभ्यते। मूल्यशिक्षायाः माध्यमेन हि समुचितमूल्यानां विकासं कृत्वा स्वजीवनं परिपूर्णं कर्तुं शक्यते। अतः शिक्षायां मूल्यशिक्षायाः महत्त्वपूर्णं स्थानं वर्तते।

**सन्दर्भग्रन्थसूची –**


1) सुभाषित तरङ्गिणी—मुल्कराज शर्मा, विद्यानिधि प्रकाशन,डी-10/1061, खजूरी खास, दिल्ली-110094, 2001.
2) श्रीमद्भगवद्गीता यथायथ—अनुवादक – श्रीमत् भक्तिचारु स्वामी, भक्तिवेदान्त वुक ट्रास्ट, श्रीमायापुर, नदीया, पश्चिमबङ्ग-741313.
3) मानवाधिकारोपेतमूल्यशिक्षा – डॉ. लक्ष्मीधर पण्डा, Teerataranga Publication,Bhubaneswar-24.
4) The Taittiriya Upnisad—A.M.Sastry, Bharatiya Kala Prakashan,3421-A, IInd Floor, Narang colony, Tri Nagar,Delhi-110035, 2004.
5) मनुस्मृतिः—डॉ. उर्मिला रुस्तगी, जे.पी.पब्लिशिंग हाउस, 27/28, शक्तिनगर, दिल्ली-110007, 2005.
6) शोधनिबन्धसारः—राष्ट्रियसंस्कृतविद्यापीठम्, मुद्रकः ष्टुडेण्टअफ्सट्, तिरुपतिः, आन्ध्रप्रदेशः, 2010.


[10] . श्रीमद्भगवद्गीता - 16/2
[11] . श्रीमद्भगवद्गीता - 16/3
[12] . Frobel
[13] . चाणक्यनीतिशतक - 13